२२१२ अ० । "दाननित्यः पवित्रश्च अस्वप्नश्च दिवाऽस्वपन्" ।

**अस्वर** पु० अप्रशस्तः स्वरोयत्र । १मन्दस्वरयुक्ते "वचनं दीनमस्वरम्" रामा० । २स्वरवर्णरहिते व्यञ्जनवर्णमात्रे पु० । ३उदात्तादिस्वररहिते लौकिकोच्चारणे च ।

**अस्वरूप** त्रि० न स्वस्येव रूपमस्य । समानस्वभावशून्ये "न त्वस्वरूप" इति मुग्धबो० ।

**अस्वर्ग्य** त्रि० स्वर्गाय हितं स्वर्ग+यत् न०त० । स्वर्गासाधने "अस्वर्ग्यं लोकविद्विष्टं तस्मात्तत् परिवर्ज्जयेत्" मनुः "अस्वर्ग्यं लोकविद्विष्टं धर्म्म्यमप्याचरेन्न तु" स्मृतिः ।

**अस्वस्थ** त्रि० न स्वस्मिन् स्वभावे तिष्ठति स्था—क ७त०न०त० । स्वस्थभिन्ने १अप्रकृतिस्थे २रोगादिना उपद्रुते च ।

**अस्वाच्छन्द्य** न० अभावे न०त० । १स्वाच्छन्द्याभावे पराधीनत्वे न०त० । २तद्वति त्रि० ।

**अस्वातन्त्र्य** न० अभावे न०त० । स्वातन्त्र्याभावे पराधीनत्वे न०त० । २तद्वति त्रि० । [अतिकषाये गोक्षुरवृक्षे ।

**अस्वादुकण्टक** पु० अस्वादुरमधुरः कण्टको यस्य । (गोखुरि)

**अस्वाध्याय** त्रि० न स्वाध्यायो वेदाध्ययनमस्य । १वेदाध्ययनहीने "अ(निः)स्वध्यायवषट्कारमिति" स्मृतिः । न स्वाध्यायो यस्मिन् । २अध्ययननिषिद्धकाले अष्टम्यादौ अनध्यायशब्दे विवृतिः । अधीयते अधि+इङ्—कर्म्मणि घञ् अध्यायः स्वस्य स्वत्रस्यानुसारेण अध्यायः स्वाध्यायः न०त० । "स्वाध्यायोऽध्येतव्य" इति श्रुत्युक्तस्वाध्यायभिन्ने ३स्वेनापाठ्ये शास्त्रादौ ।

**अस्वामिक** त्रि० न स्वामी यस्य । १स्वामिरहिते "अटव्यः पर्व्वताः पुण्या नद्यस्तीर्थानि यानि च । सर्व्वाण्यस्वामिकान्याहुर्न हि तेषु परिग्रहः" इति स्मृतिः । २निध्यादौ च । "प्रनष्टमस्वामिकमधिगम्य" गौत० ।

**अस्वामिकृत** त्रि० अस्वामिना कृतः । अस्वामिना कृते विक्रयादौ "अस्वामिकृतत्वेन तुल्यत्वादिति" मिता०

**अस्वामिविक्रय** पु० अस्वामिना कृतो विक्रयः । १अस्वामिना कृते विक्रये २तद्विषये व्यवहारभेदे च । यथाह नारदः "निक्षिप्तं वा परद्रव्यं नष्टं लब्ध्वाऽपहृत्य वा । विक्रीयतेऽसमक्षं यत् स ज्ञेयोऽस्वामिविक्रय" इति । तत्र किमित्याह या० "स्वं लभेतान्यविक्रीतं क्रेतुर्दोषोऽप्रकाशिते । हीनाद्रहो हीनमूल्ये वेलाहीने च तस्करः" "स्वमात्मसम्बन्धि द्रव्यं अन्यविक्रीतमस्वामिविक्रीतं यदि पश्यति तदा लभेत गृह्णीयात् । अस्वामिविक्रयस्य स्वत्वहेतुत्वाभावात् । विक्रीतग्रहणन्दत्ताहितयोरुपलक्षणार्थम् अस्वामिकृतत्वेन तुल्यत्वात् । अतएवोक्तम् । "अस्वामिविक्रयन्दत्तमाधिञ्च विनिवर्तयेदिति" क्रेतुः पुनरप्रकाशिते गोपिते क्रये दोषो भवति । तथा हीनात्सद्द्रव्यागमोपायहीनात् । रहसि चैकान्ते सम्भाव्यद्रव्यादपि हीनमूल्येनाल्पतरेण मूल्येन च क्रये वेलाहीने वेलया हीनोवेलाहीनः क्रयोरात्र्यादौ तत्र कृतः क्रेता तस्करो भवति तस्करवत् दण्डभाग्भवतीत्यर्थः । यथोक्तम् । "द्रव्यमस्वामिविक्रीतम्प्राप्य स्वामी तदाप्नुयात् । प्रकाशक्रयतः शुद्धिः क्रेतुः स्तेयं रहःक्रयादिति" स्वाम्यभियुक्तेन क्रेत्रा किं कर्तव्यमित्यत आह । "नष्टापहृतमासाद्य हर्तारं ग्राहयेन्नरम् । देशकालातिपत्तौ च गृहीत्वा स्वयमर्पयेत्" या० नष्टमपहृतं वान्यदीयं क्रयादिना प्राप्य हर्तारं विक्रेतारं ग्राहयेच्चौरोद्धरणकादिभिः आत्मविशुध्यर्थं राजदण्डाप्राप्त्यर्थञ्च । "अथाविदितदेशान्तरङ्गतः कालान्तरे वा विपन्नस्तदा मूलसमाहरणाशक्तो विक्रेतारमदर्शयित्वैव स्वयमेव तद्धनन्नाष्टिकस्य समर्पयेत् तावतैवासौ शुद्धो भवतीति" श्रीकराचार्य्येण व्याख्यातम् । तदिदमनुपपन्नम् । विक्रेतुर्दर्शनाच्छुद्धिरित्यनेन पौनरुक्त्यप्रसङ्गात् । अतोऽन्यथा व्याख्यायते । नष्टापहृतमिति नाष्टिकम्प्रति अयमुपदेशः । नष्टमपहृतं आत्मीयन्द्रव्यमासाद्य क्रेतृहस्तस्थं ज्ञात्वा तं हर्त्तारं क्रेतारं स्थानपालादिभिर्ग्राहयेत् देशकालातिपत्तौ देशकालातिक्रमे स्थानपालाद्यसन्निधाने तद्विज्ञापनकालात्प्राक् पलायनाशङ्कायां स्वयमेव गृहीत्वा तेभ्यः समर्पयेत् । ग्राहिते हर्त्तरि किं कर्त्तव्यमित्यत आह । "विक्रेतुर्दर्शनाच्छुद्धिः स्वामी द्रव्यं नृपोदमम् । क्रेता मूल्यमवाप्नोति तस्माद्यस्तस्य विक्रयी" या० यद्यसौ गृहीतः क्रेता न मयेदमपहृतम् अन्यसकाशात् प्राप्तमिति वक्ति तदा तस्य क्रेतुर्विक्रेतृदर्शनमात्रेण शुद्धिर्भवति । न पुनरसावभियोज्यः । किन्तु तत्प्रदर्शितेन विक्रेत्रा सह नाष्टिकस्य विवादः । यथाह वृहस्पतिः । "मूले समाहृते क्रेता नाभियोज्यः कथञ्चन । मूलेन सह वादस्तु नाष्टिकस्य विधीयत" इति । तस्मिंश्च विवादे यद्यस्वामिविक्रयनिश्चयो भवति तदा तस्य नष्टापहृतस्य गवादिद्रव्यस्य यो विक्रयी विक्रेता तस्य सकाशात्स्वामी नाष्टिकः स्वीयं द्रव्यमवाप्नोति नृपश्चापराधानुरूपन्दण्डं क्रेता च मूल्यमवाप्नोति । अथासौ देशान्तरङ्गतस्तदा योजनसंख्ययाऽऽनयनार्थं कालोदेयः । "प्रकाशं वा क्रयं कुर्य्यान्मूलं वापि समर्पयेत् । मूलानयनकालश्च देयस्तत्राध्वसंख्ययेति"